ષષ્ઠસ્કન્ધે નારદશાપો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ ષષ્ઠોઽધ્યાયઃ - ૬ ॥

શ્રીશુક ઉવાચ
તતઃ પ્રાચેતસોઽસિક્ન્યામનુનીતઃ સ્વયમ્ભુવા ।
ષષ્ટિં સઞ્જનયામાસ દુહિતૄઃ પિતૃવત્સલાઃ ॥ ૧॥

દશ ધર્માય કાયેન્દોર્દ્વિષટ્ત્રિણવ દત્તવાન્ ।
ભૂતાઙ્ગિરઃકૃશાશ્વેભ્યો દ્વે દ્વે તાર્ક્ષ્યાય ચાપરાઃ ॥ ૨॥

નામધેયાન્યમૂષાં ત્વં સાપત્યાનાં ચ મે શ‍ૃણુ ।
યાસાં પ્રસૂતિપ્રસવૈર્લોકા આપૂરિતાસ્ત્રયઃ ॥ ૩॥

ભાનુર્લમ્બા કકુદ્યામિર્વિશ્વા સાધ્યા મરુત્વતી ।
વસુર્મુહૂર્તા સઙ્કલ્પા ધર્મપત્ન્યઃ સુતાઞ્છૃણુ ॥ ૪॥

ભાનોસ્તુ દેવઋષભ ઇન્દ્રસેનસ્તતો નૃપ ।
વિદ્યોત આસીલ્લમ્બાયાસ્તતશ્ચ સ્તનયિત્નવઃ ॥ ૫॥

કકુદઃ સઙ્કટસ્તસ્ય કીકટસ્તનયો યતઃ ।
ભુવો દુર્ગાણિ જામેયઃ સ્વર્ગો નન્દિસ્તતોઽભવત્ ॥ ૬॥

વિશ્વેદેવાસ્તુ વિશ્વાયા અપ્રજાંસ્તાન્ પ્રચક્ષતે ।
સાધ્યોગણસ્તુ સાધ્યાયા અર્થસિદ્ધિસ્તુ તત્સુતઃ ॥ ૭॥

મરુત્વાંશ્ચ જયન્તશ્ચ મરુત્વત્યાં બભૂવતુઃ ।
જયન્તો વાસુદેવાંશ ઉપેન્દ્ર ઇતિ યં વિદુઃ ॥ ૮॥

મૌહૂર્તિકા દેવગણા મુહૂર્તાયાશ્ચ જજ્ઞિરે ।
યે વૈ ફલં પ્રયચ્છન્તિ ભૂતાનાં સ્વસ્વકાલજમ્ ॥ ૯॥

સઙ્કલ્પાયાશ્ચ સઙ્કલ્પઃ કામઃ સઙ્કલ્પજઃ સ્મૃતઃ ।
વસવોઽષ્ટૌ વસોઃ પુત્રાસ્તેષાં નામાનિ મે શ‍ૃણુ ॥ ૧૦॥

યત્ર નારાયણો દેવઃ સ્વાંશેનાવાતરદ્વિભુઃ ॥ ૩૮॥

વિવસ્વાનર્યમા પૂષા ત્વષ્ટાથ સવિતા ભગઃ ।
ધાતા વિધાતા વરુણો મિત્રઃ શક્ર ઉરુક્રમઃ ॥ ૩૯॥

વિવસ્વતઃ શ્રાદ્ધદેવં સંજ્ઞાસૂયત વૈ મનુમ્ ।
મિથુનં ચ મહાભાગા યમં દેવં યમીં તથા ।
સૈવ ભૂત્વાથ બડવા નાસત્યૌ સુષુવે ભુવિ ॥ ૪૦॥

છાયા શનૈશ્ચરં લેભે સાવર્ણિં ચ મનું તતઃ ।
કન્યાં ચ તપતીં યા વૈ વવ્રે સંવરણં પતિમ્ ॥ ૪૧॥

અર્યમ્ણો માતૃકા પત્ની તયોશ્ચર્ષણયઃ સુતાઃ ।
યત્ર વૈ માનુષી જાતિર્બ્રહ્મણા ચોપકલ્પિતા ॥ ૪૨॥

પૂષાનપત્યઃ પિષ્ટાદો ભગ્નદન્તોઽભવત્પુરા ।
યોઽસૌ દક્ષાય કુપિતં જહાસ વિવૃતદ્વિજઃ ॥ ૪૩॥

ત્વષ્ટુર્દૈત્યાનુજા ભાર્યા રચના નામ કન્યકા ।
સન્નિવેશસ્તયોર્જજ્ઞે વિશ્વરૂપશ્ચ વીર્યવાન્ ॥ ૪૪॥

તં વવ્રિરે સુરગણા સ્વસ્રીયં દ્વિષતામપિ ।
વિમતેન પરિત્યક્તા ગુરુણાઙ્ગિરસેન યત્ ॥ ૪૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે ષષ્ઠોઽધ્યાયઃ ॥ ૬॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ સપ્તમોઽધ્યાયઃ - ૭ ॥

રાજોવાચ
કસ્ય હેતોઃ પરિત્યક્તા આચાર્યેણાત્મનઃ સુરાઃ ।
એતદાચક્ષ્વ ભગવઞ્છિષ્યાણામક્રમં ગુરૌ ॥ ૧॥

શ્રીશુક ઉવાચ
ઇન્દ્રસ્ત્રિભુવનૈશ્વર્યમદોલ્લઙ્ઘિતસત્પથઃ ।

# ॥ નવમોऽધ્યાયઃ - ૯ ॥

શ્રીશુક ઉવાચ
તસ્યાસન્ વિશ્વરૂપસ્ય શિરાંસિ ત્રીણિ ભારત ।
સોમપીથં સુરાપીથમન્નાદમિતિ શુશ્રુમ ॥ ૧॥

સ વૈ બર્હિષિ દેવેભ્યો ભાગં પ્રત્યક્ષમુચ્ચકૈઃ ।
અદદદ્યસ્ય પિતરો દેવાઃ સપ્રશ્રયં નૃપ ॥ ૨॥

સ એવ હિ દદૌ ભાગં પરોક્ષમસુરાન્ પ્રતિ ।
યજમાનોऽવહદ્ભાગં માતૃસ્નેહવશાનુગઃ ॥ ૩॥

તદ્દેવહેલનં તસ્ય ધર્માલીકં સુરેશ્વરઃ ।
આલક્ષ્ય તરસા ભીતસ્તચ્છીર્ષાણ્યચ્છિનદ્રુષા ॥ ૪॥

સોમપીથં તુ યત્તસ્ય શિર આસીત્કપિઞ્જલઃ ।
કલવિઙ્કઃ સુરાપીથમન્નાદં યત્સ તિત્તિરિઃ ॥ ૫॥

બ્રહ્મહત્યામઞ્જલિના જગ્રાહ યદપીશ્વરઃ ।
સંવત્સરાન્તે તદઘં ભૂતાનાં સ વિશુદ્ધયે ॥ ૬॥

ભૂમ્યમ્બુદ્રુમયોષિદ્ભ્યશ્ચતુર્ધા વ્યભજદ્ધરિઃ ।
ભૂમિસ્તુરીયં જગ્રાહ ખાતપૂરવરેણ વૈ ॥ ૭॥

ઈરિણં બ્રહ્મહત્યાયા રૂપં ભૂમૌ પ્રદૃશ્યતે ।
તુર્યં છેદવિરોહેણ વરેણ જગૃહુર્દ્રુમાઃ ॥ ૮॥

તેષાં નિર્યાસરૂપેણ બ્રહ્મહત્યા પ્રદૃશ્યતે ।
શશ્વત્કામવરેણાંહસ્તુરીયં જગૃહુઃ સ્ત્રિયઃ ॥ ૯॥

રજોરૂપેણ તાસ્વંહો માસિ માસિ પ્રદૃશ્યતે ।
દ્રવ્યભૂયોવરેણાપસ્તુરીયં જગૃહુર્મલમ્ ॥ ૧૦॥

તાસુ બુદ્બુદફેનાભ્યાં દૃષ્ટં તદ્ધરતિ ક્ષિપન્ ।
હતપુત્રસ્તતસ્ત્વષ્ટા જુહાવેન્દ્રાય શત્રવે ॥ ૧૧॥

ઇન્દ્રશત્રો વિવર્ધસ્વ મા ચિરં જહિ વિદ્વિષમ્ ।
અથાન્વાહાર્યપચનાદુત્થિતો ઘોરદર્શનઃ ॥ ૧૨॥

કૃતાન્ત ઇવ લોકાનાં યુગાન્તસમયે યથા ।
વિષ્વગ્વિવર્ધમાનં તમિષુમાત્રં દિને દિને ॥ ૧૩॥

પાર્વત્યુવાચ
અયં કિમધુના લોકે શાસ્તા દણ્ડધરઃ પ્રભુઃ ।
અસ્મદ્વિધાનાં દુષ્ટાનાં નિર્લજ્જાનાં ચ વિપ્રકૃત્ ॥ ૧૧॥

ન વેદ ધર્મં કિલ પદ્મયોનિ-
ર્ન બ્રહ્મપુત્રા ભૃગુનારદાદ્યાઃ ।
ન વૈ કુમારઃ કપિલો મનુશ્ચ
યે નો નિષેધન્ત્યતિવર્તિનં હરમ્ ॥ ૧૨॥

એષામનુધ્યેયપદાબ્જયુગ્મં
જગદ્ગુરું મઙ્ગલમઙ્ગલં સ્વયમ્ ।
યઃ ક્ષત્રબન્ધુઃ પરિભૂય સૂરીન્
પ્રશાસ્તિ ધૃષ્ટસ્તદયં હિ દણ્ડ્યઃ ॥ ૧૩॥

નાયમર્હતિ વૈકુણ્ઠપાદમૂલોપસર્પણમ્ ।
સમ્ભાવિતમતિઃ સ્તબ્ધઃ સાધુભિઃ પર્યુપાસિતમ્ ॥ ૧૪॥

અતઃ પાપીયસીં યોનિમાસુરીં યાહિ દુર્મતે ।
યથેહ ભૂયો મહતાં ન કર્તા પુત્ર કિલ્બિષમ્ ॥ ૧૫॥

શ્રીશુક ઉવાચ
એવં શપ્તશ્ચિત્રકેતુર્વિમાનાદવરુહ્ય સઃ ।
પ્રસાદયામાસ સતીં મૂર્ધ્ના નમ્રેણ ભારત ॥ ૧૬॥

ચિત્રકેતુરુવાચ
પ્રતિગૃહ્ણામિ તે શાપમાત્મનોઽઞ્જલિનામ્બિકે ।
દેવૈર્મર્ત્યાય યત્પ્રોક્તં પૂર્વદિષ્ટં હિ તસ્ય તત્ ॥ ૧૭॥

સંસારચક્ર એતસ્મિઞ્જન્તુરજ્ઞાનમોહિતઃ ।
ભ્રામ્યન્ સુખં ચ દુઃખં ચ ભુઙ્ક્તે સર્વત્ર સર્વદા ॥ ૧૮॥

નૈવાત્મા ન પરશ્ચાપિ કર્તા સ્યાત્સુખદુઃખયોઃ ।
કર્તારં મન્યતેઽત્રાજ્ઞ આત્માનં પરમેવ ચ ॥ ૧૯॥

ગુણપ્રવાહ એતસ્મિન્ કઃ શાપઃ કો ન્વનુગ્રહઃ ।
કઃ સ્વર્ગો નરકઃ કો વા કિં સુખં દુઃખમેવ વા ॥ ૨૦॥

એકઃ સૃજતિ ભૂતાનિ ભગવાનાત્મમાયયા ।
એષાં બન્ધં ચ મોક્ષં ચ સુખં દુઃખં ચ નિષ્કલઃ ॥ ૨૧॥

